ॐ

SRI DIGVIJAYARAMO VIJAYATE

SRIMAJJAGADGURU MADHWACHARYA MOOLAMAHASAMSTHANA

# UTTARADIMATH

**Administrative Office :**

Sri Satyapramodateertha Road, 5th Cross, Shankarapuram, Basavanagudi Bengaluru-560004

Phone : **9448128108**

Camp : Suvarnapuri

Date : 23/12/2020

श्रीचरणानामाज्ञानुसारेण प्रेषितः

## अनुग्रहसन्देशः

महदिदं प्रमोदस्थानं यद्रामकुटुम्बसंस्थानीयश्रुतिरामगुरुकुलतः ध्वनिदीपिकानाम्नी ऋग्वेदव्याख्या प्रकटीक्रियत इति । इयं व्याख्या, प्रथितयशसां श्रीकृष्णभक्तिप्रसारकार्ये कृतभूरिपरिश्रमाणां रचितानेकधार्मिकग्रन्थानां श्रीकृष्णप्रेमस्वामिनां सुपुत्रेण विदुषा रङ्गनाथमहोदयेन विरचिता । श्लाघनीयोऽयं प्रयत्नः ।

जगद्गुरुभिः श्रीमन्मध्वाचार्यैः सर्वोऽपि वेदः परममुख्यवृत्त्या शुद्धानन्दोरुसंविद्द्युतिबलबहुलौदार्यवीर्यादिदेहं चिन्तासन्तापलेपोद्भवमृतिमुखराशेषदोषातिदूरं जीवजडात्मकप्रपञ्चादत्यन्तविलक्षणं सत्यजगज्जन्मादिकारणं सर्वोत्तमं मुक्तामुक्तनियामकं श्रीमन्नारायणमेव सतात्पर्यं प्रतिपादयतितमां स्तौतितमामिति प्रत्यपादि उपापादि च स्वग्रन्थेषु । उदाजह्रिरे चास्मिन् विषये- 'वेदैश्च सर्वैरहमेव वेद्यः', 'सर्वे वेदा यत्पदमामनन्ति', 'नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति', 'यो देवानां नामधा एक एव' इत्यादीनि भूयांसि प्रमाणानि । मध्वप्रदर्शिताध्वनैव व्याख्यानं विधेयमिति माध्वानामस्माकं सुदृढनिरूढोऽध्वा । नेममध्वानं सर्वात्मना अनुसरतीदं व्याख्यानं यद्यपि ।

तथापि वैदिकश्रद्धाह्रासभूयिष्ठेऽस्मिन् कराले कलियुगे वैदिकवाङ्मये महत्या श्रद्धया बहुव्याख्यानानुसारेण समग्रायाः ऋग्वेदसंहिताया आध्यात्मिक्या दृष्ट्या व्याख्यानं नाल्पप्रयत्नसाध्यं किन्तु बह्वालोचनप्रभवमिति नूनं श्लाघाविषयतां भजत इदम् । यद्यपि समग्रं व्याख्यानं नावलोकयाञ्चक्रे । तथापि भागशः अवलोक्यायमभिप्रायः प्रकटीचक्रे ।

ग्रन्थकर्तारमेतं अस्मदुपास्याः श्रीमन्मूलसीतासमेतश्रीमन्मूलरामदिग्विजयरामवेदव्यासवंशरामप्रसन्नविठ्ठलाः ज्ञानभक्तिवैराग्यादिदानेन समनुगृह्णन्त्विति सम्प्रार्थयामह इत्यजिज्ञपन् श्रीचरणा इति शम् ।

श्रीचरणाज्ञाधारकः

बि शशिधराचार्यः

श्री शशिधराचार्यः ब्रह्मेश्वरः

उपप्रधानकार्यदर्शी श्रीमदुत्तरादिमठः

**G B SHASHIDHARACHAR**

**UPA DIWAN**

**UTTARADIMATH**